# कक्षा - XII (केन्द्रिकम्)

## विषय– 'संस्कृतम्'

समयः घण्टात्रयम् पूर्णाङ्काः 100

निर्देशः

(1) सर्वे प्रश्नाः संस्कृतेनैव उत्तरणीयाः।

(2) उत्तराणि पृथक् दत्तायाम् उत्तर पुस्तिकायाम् एव लेखनीयानि।

(3) अस्मिन् पत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः 'क' | (अपठितांश–अवबोधनम्) | 15 अङ्काः |
| खण्डः 'ख' | (संस्कृतन रचनात्मककार्यम्) | 15 अङ्काः |
| खण्डः 'ग' | (अनुप्रयुक्तव्याकरणम्) | 50 अङ्काः |
| खण्डः 'घ' | (पठितांश–अवबोधनम्) | 20 अङ्काः |

## खण्डः 'क' 15

## अपठितांश–अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 10

इह जगति सर्वाधिकं मूल्यवत् वस्तु चेत् अस्ति तर्हि समयः एव। मानवजीवनस्य प्रत्येकं क्षणम् अतीव महत्त्वपूर्णम् अस्ति। यस्य आयुषः यावान् अंशः निरर्थकं गतः, स गतः एव। नष्टः कालः केनापि उपायेन पुनः प्राप्तुं न शक्यते। धनादिकवस्तूनि तु विनष्टानि अपि पुनः प्रयत्नेन लब्धुं शक्यन्ते। अनेके जनाः तु दुर्व्यसने, द्यूते, विवादे, वृथा भ्रमणे निद्रायां च समस्तं समयं यापयन्ति। शनैः शनैः काले व्यर्थे गते सति ईदृशाः जनाः पश्चात् नैराश्यं यान्ति। सफलतायाः समुन्नतेः च मूलमन्त्रम् अस्ति– ''प्रत्येकं क्षणस्य सदुपयोगः। प्रकृतिः अपि समयस्य सदुपयोगम् एव शिक्षयति। अतः आत्मविकासाय सर्वथा समयस्य सदुपयोगः कर्तव्यः। उक्तं च– 'क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्'' इति।

(अ) एकपदेन उत्तरत। ½×4=2

(i) कस्य सदुपयोगं प्रकृतिः शिक्षयति?

(ii) मानवजीवनस्य किं महत्त्वपूर्णम् अस्ति?

(iii) जगति सर्वाधिकं मूल्यवत् वस्तु किम् अस्ति?

(iv) क्षिप्रमक्रियमाणस्य रसं कः पिबति?

(ब) पूर्णवाक्येन उत्तरत। 1×2

(i) समयस्य महत्त्वम् अजानन्तः अनेके जनाः समस्तं समयं कथम् यापयन्ति? =2

(ii) सफलतायाः समुन्नतेः च मूलमन्त्रं किम् अस्ति?

(स) यथानिर्देशम् उत्तरत। 1×4 =4

(i) 'यस्य आयुषः' अत्र 'यस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ii) 'यान्ति' इति क्रियापदस्य कर्तृपदं किम्?

(iii) 'विनष्टानि' इतिपदस्य विशेष्यपदं किम्?

(iv) 'दुरुपयोगः' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम्?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत। 2×1 =2

## खण्डः 'ख' **15**

## संस्कृतेन रचनात्मककार्यम्

**2.** परीक्षापरिणाम विषये पितरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसाहाय्येन पूरयित्वा पत्रं पुनः लिखत। ½×10=5

कमला नेहरू छात्रावासः

(i) ...............................

तिथिः ..................................................

पूज्यपितृचरणाः!

(ii) ...............................।

अत्र कुशलं तत्रास्तु। अद्यैव (iii) ............................... परीक्षा परिणामः घोषितः। अहं स्वविद्यालये द्वादशकक्षायां सर्वाधिकाः प्रतिशतं (iv) ............................... अङ्काः लब्धाः। संस्कृतविषये तु अष्टनवतिः अङ्काः (v) ...............................। एवं हि विद्यालये (vi) ............................... अङ्कान् प्राप्य अहं प्रथमं स्थानं लब्धवान्। प्राचार्यः, गुरुजनाः, सहपाठिनः। सर्वे च मत्कृते हार्दिकं (vii) ............................... शुभकामनाः च दत्तवन्तः। शिक्षकाणां (vii) ............................... भवतां च प्रेरणा मित्राणां च सहृदयता एव मम साफल्यस्य कारणम्। मातृचरणयोः मे (ix) ...............................।

भवताम् आत्मजः

(x) ...............................

मञ्जूषा–

| |
|---|
| मार्गदर्शनम्, प्रयागतः, पञ्चनवतिः, सर्वाधिकान्, सत्यव्रतः, सादरं प्रणामाः, मम, समुपलब्धाः, वर्धापनं प्रणामाञ्जलिः। |

**3.** अधोलिखितायां लघुकथायां रिक्तस्थानानि मञ्जूषाप्रदत्तपदानां सहायतया पूरयित्वा कथां पुनः लिखत। ½× 10= 5

...................................................... एकदा द्वे मित्रे कुत्रचित् गच्छतः स्म। तौ (i) .................................. ..................... समीपं प्राप्तवन्तौ। तौ (ii) ...................................................... एकस्य वृक्षस्य अधः अतिष्ठताम्। तौ सहसा आगतम् एकं (iii) ...................................................... दृष्टवन्तौ। भल्लूकं दृष्ट्वा तौ (iv) ......................................................। तमोः एकं मित्रं शीघ्रमेव वृक्षम् (v) .................. .................................. पर्णानां मध्ये स्थितवान्। द्वितोयः तु श्वासं रुद्ध्वा तथैव (vi) .......................... .......................... शयितः। भल्लूकः शयितं मित्रम् अजिघ्रत् तं च (vii) .............................................. ........ मत्वा अग्रे अगच्छत्। तदा वृक्षारुढः सखा वृक्षात् (viii) ......................................................। सः मित्रम् अपृच्छत् ''भल्लूकः तव (ix) ...................................................... किं कथितवान्? सः अवदत्– ''यन्मित्रं संकटे त्यजति तस्य (x) ...................................................... त्याज्या एव। एतत् श्रुत्वा प्रथमं मित्रं लज्जितम् आसीत्।

मञ्जूषा–

| |
|---|
| विश्रान्तुं, वनस्य, भयभीतौ, भूमौ भल्लूकं, आरुहय, मृतं, कर्णयोः अवातरत्, मैत्री |

**4.** 'विद्याधनं सर्वधनप्रधानम्' इति विषयम् अधिकृत्य मञ्जूषापदानां सहायतया पञ्च संस्कृतवाक्येषु वर्णनं कुरुत। 1×5 =5

**मञ्जूषा–**

| |
|---|
| अन्यधनानि, विद्यया, ज्ञानम्, साहाय्यं, विपदि, नष्टानि, विवेकः, भोगकरी, यशः, वर्धते, आत्मविकासः, चौर्येण, सर्वदा, विदेशे, विद्याधनं, न अपह्रियते, न विभज्यते, मित्रवत्, व्ययकृते तु। |

## खण्डः 'ग' 30

## अनुप्रयुक्तव्याकरणम्

**5.** अधोलिखितेषु वाक्येषु रेखांङ्कितपदानां सन्धिच्छेदं कुरुत। 1×6 =6

(i) सत्यमेव जयति नानृतम्।

(ii) इनश्च दिनस्य।

(iii) ममापि तव आज्ञायाः उल्लंघनम एव।

(iv) तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह।

(v) सद्विद्या यदि किं धनैरपयशो यद्यस्ति।

(vi) सुखं हि दुःखान्यनुभूय शोभते।

**6.** अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहं लिखत। 1×6 =6

(i) प्रथमं राष्ट्रसंरक्षणम् ततः उत्सवाः इति।

(ii) मानवः स्वभावाद् एव उत्सवप्रियः।

(iii) सुमहिमा यद्यस्ति किं मण्डनैः।

(iv) चारुदत्तः यथाविभवं गृहदैवतानि अर्चयन् आगच्छति।

(v) अयमेव अहारात्रं जनयति।

(vi) अथ प्रतिषिद्धः कौमुदीमहोत्सवः।

**7.** अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत– प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत। 1×5 =5

(अ) (i) कञ्चुकी ........................ वदति। (प्र + विश् + ल्यप्)

(ii) शिष्येण गुरोः आज्ञा ........................। (पाल् + अनीयर्)

(iii) अत एव अहं ........................ इच्छामि। (श्रु + तुमुन्)

(iv) ततः प्रभाते अत्र ........................। (आ + गम् + तव्यत्)

(v) नक्षत्रादयः पश्चिमं प्रति ........................ प्रतीयन्ते। (धाव् + शतृ)

(आ) (vi) न निष्प्रयोजनं प्रभुभिः आहूयन्ते ........................ (अधिकार + इनि)

(vii) मठानां ........................ प्रेक्षकान् आकर्षति। (भव्य + तल्) 1×3 =3

(viii) त्वं ........................ भव। (ज्ञान + मतुप्)

**8** अधोलिखितवाक्येषु कर्तृ–क्रियापदयोः अन्वितिः क्रियताम्। 1×5 =5

(i) वृषलः मां द्रष्टुम् इच्छसि। इच्छति।

(ii) वीरैः कृतं शौर्यं यूयं जानीथ। जानन्ति।

(iii) किमर्थम् अहं सन्तापं करिष्यत। करिष्ये।

(iv) अनागतविधाता सर्वान् मत्स्यान् इदम् अवदन्। अवदत्।

(v) वयम् किमर्थम् अत्र आहूताः। आहूतः।

**अथवा/OR**

अधोलिखितवाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणानि चित्वा योजयत। 1×5 =5

(i) वेदा एतस्य एव ....................................।

(ii) .................................... निपतन्ति पादपाः।

(iii) भवतः .................................... दरिद्रभावः।

(iv) .................................... एव भवतः प्रस्तुतिः।

(v) अर्थशास्त्रे .................................... विषयाः वर्णिताः।

मञ्जूषा–

| रमणीयः, प्रशंसनीया, वन्दिनः, सुबद्धमूलाः बहवः, |
|---|

**9.** अधोलिखितेषु वाक्येषु कोष्ठकगतशब्दैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत। 1×5 =5

(i) (सुगाङ्गप्रसाद) ............................................. उपरि स्थिताः प्रदेशाः संस्क्रियताम्।

(ii) राक्षस! विरम विरम ............................................. (दुर्व्यसन)

(iii) तत् अलं ............................................. (संताप)

(iv) (सभापति) ............................................. नमः।

(v) अये (सिंहासन) ............................................. अध्यास्ते वृषलः।

## खण्डः 'घ' 35

## पठितांश–अवबोधनम

**10.** अधोलिखितं पद्यांशं गद्यांशं नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत। 1×6 =6

(क) पद्यम्

शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च सदैव तिष्ठति।।

(अ) एकपदेन उत्तरत। 1×1 =2

(i) जलस्थानगतं च किम् शुष्यति?

(ii) कालपर्ययात् का क्षयं गच्छति?

(ब) पूर्णवाक्येन उत्तरत। 1×1 =1

(i) किं किं सदैव तिष्ठति?

(स) यथानिर्देशम् उत्तरत।

(i) 'वृक्षाः' इत्यस्य पर्यायपदं किं प्रयुक्तम्? ½

(ii) 'जलम्' इत्यस्य विशेषणपदं किम्? ½

(iii) 'वृद्धिम्' इति पदस्य विलोमपदं किम्? 1

(iv) 'तिष्ठति' इति क्रियापदस्य कर्तृपदं किम्? 1

(ख) गद्यांशः

(i) अयमेव अहोरात्रं जनयति। अयम् एव वत्सरं द्वादशसु भागेषु विभनक्ति। अयमेव कारणं षण्णाम् ऋतूनाम्। एष एव अङ्गोकरोति उत्तरं दक्षिणं चायनम्। अनेन एव सम्पादिताः युगभेदाः। अनेन एव कृताः कल्पभेदाः। एनम् एव अश्रित्य भवति परमेष्ठिनः परार्द्धसंख्या।

(अ) एकपदेन उत्तरत। ½= 2=1

(i) परार्द्धसंख्या कस्य भवति?

(ii) सूर्यः वत्सरं कति भागेषु विभनक्ति?

(ब) पूर्णवाक्येन उत्तरत।

(i) सूर्यः किम् अङ्कीरोति?

(स) यथानिर्देशम् उत्तरत। 1×1 =1

(i) 'ऋतूनाम्' इत्यस्य विशेषणपदं किम्?

(ii) 'ब्रह्मणः' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(iii) 'अनेन एव सम्पादिताः युगभेदाः 'अत्र अनेन' इति सर्वनामपदं कस्मै प्रयुक्तम्? ½

(iv) 'जनयति' इति क्रियापदस्य कर्तृपदं किम्? ½

(स) नाट्यांशः 1

कञ्चुकी– (प्रविश्य) (परिक्रम्य अवलोक्य च) इदम् आचार्यचाणक्यस्य गहम्। अहो राजाधिराज–मन्त्रिणो विभूतिः। तथाहि गोमयानाम् उपलभेदकम् एतत् प्रस्तरखण्डम्, इतः शिष्यैः आनीतानां दर्भाणां स्तूपः अत्र शुष्यमाणैः समिद्भिः अतिनमितः छदिप्रान्तः जीर्णाः भित्तयः। अत एव निस्पृहत्याभि एतादृशैः जनैः राजा तृणवद् गण्यते। (भूमौ निपत्य) जयत् आर्यः। 1

चाणक्यः– वैहीनरे! किम् आगमनप्रयोजनम्?

कञ्चुकी– आर्य! देवः चन्द्रगुप्तः आर्यं शिरसा प्रणम्य विज्ञापयति–

''यदि कार्ये बाधा न स्यात् तर्हि आर्यं द्रष्टुम् इच्छामि''।

चाणक्यः– एवम्! वृषलः मां द्रष्टुम् इच्छति।

(अ) एकपदेन उत्तरत।

(i) उपलभेदकं किम् अस्ति? ½=2=1

(ii) अतिनमितः कः?

(ब) पूर्णवाक्येन उत्तरत। 1×1 =1

(i) कीदृशैः जनैः राजा तृणवद् गण्यते?

(स) यथानिर्देशम् उत्तरत।

(i) 'समिद्भिः' इति पदस्य विशेषणपदं किं प्रयुक्तम्? ½

(ii) 'कुशानाम्' इत्यर्थे किं पदं प्रयुक्तम्? ½

(iii) 'विज्ञापयति' इति क्रियापदस्य कर्तृपदं किम्? 1

(iv) 'माम' इति सर्वनामपदं कस्मै प्रयुक्तम्?

1

**11** यथानिर्देशं प्रश्नद्वयम् उत्तरत। 1×2 =2

(i) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः'
अस्य सन्दर्भग्रन्थः कः तस्य च लेखकः कः?

(ii) भोः दारिद्रयं खलु नाम मनस्विनः पुरुषस्य 1+1 =2

सोच्छ्वासं मरणम्' इति कः कम् प्रति कथयति!

**12.** प्रत्येकम् अंशस्य प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत। 2+2 =4

(अ) दुराराध्या हि राजलक्ष्मीः।

भावार्थः

(i) राजलक्ष्मोः सर्वैः न आराध्या।

(ii) राज्यं प्रति कृतकल्याणकर्मभिः अपि राजलक्ष्मीः सहजतया न प्रसादनीया।

(iii) राज्यसत्तासुखं प्राप्तुं सर्वैः कठिनं तपः करणीयम्।

(ब) सुरक्षितं दैवहतं विनश्यति।

(i) सकला संपदा ईश्वराधीना एव रक्ष्या।

(ii) कोऽपि देवः कमपि रक्षितुं न समर्थः।

(iii) नरैः सर्वथा रक्षितं किमपि वस्तु दुर्भाग्येन विनाशं याति।

**अथवा/OR**

अधोलिखितस्य पद्यस्य प्रदत्तभावार्थं मञ्जूषापदैः पूरयित्वा पुनः लिखत। 1×4 =4

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषां न ते वन्द्याः।।

भावार्थः

येषां जनानां सुखं (i) ........................... निवाससस्थानं भवति, हृदयं तु सदा (ii) ........................... भवति, वाणयः (iii) ........................... वर्षन्ति येषां च जीवनं (iv) ........................... एव भवति ते तु सर्वैः एव वन्दनीयाः भवन्ति।

| परोपकाराय, प्रसन्नतायाः, अमृतं दयापूर्णं |
|---|

**13** अधोलिखितश्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत। ½×8 =4

(अ) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानम् ततो न विजुगुप्सते।।

अन्वयः–

यः तु सर्वाणि (i) ........................... आत्मनि एव (ii) ........................... ।

सर्वभूतेषु च (iii) ........................... (अनुपश्यति) ततः (iv)

........................... विजुगुप्सते।

(आ) अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।।

अन्वयः–

अनन्तरत्नप्रभवस्य (i) ........................... हिमम् (ii) ........................... न जातम्। एकः हि (iii) ........................... गुणसन्निपाते इन्दोः (iv) ........................... अङ्कः इव निमज्जति।

**मञ्जूषा**

| यस्य, भूतानि, न सौभाग्यविलोपि, दोषः, अनुपश्यति, किरणेषु, आत्मानम् |
|---|

**14** 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकमेलनं कृत्वा वाक्यानि पुनः लिखत। 1×4 =4

| (क) | (ख) |
|---|---|
| (i) भाग्यक्रमेण हि | (अ) अन्यत्रगतानामपि मृत्युभविष्यति। |
| (ii) 'पाई' इत्यस्य मूल्यं | (ब) प्राप्य वरान्निबोधत। |
| (iii) आयुः क्षयोऽस्ति चेत् | (स) धनानि पुनर्भवन्ति। |
| (iv) उत्तिष्ठत जाग्रत | (द) आर्यभटेन एव सर्वप्रथमं स्पष्टीकृतम् |

**15** अधोलिखितवाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं उचितम् अर्थं चित्वा लिखत। 1×4 =4

(अ) स किं सखा <u>साधु</u> न शास्ति योऽधिपम्।
- (i) महात्मा
- (ii) सम्यक्
- (iii) सरलतया

(ब) चक्रवर्ती <u>खेचरचक्रस्य</u>।
- (i) सुदर्शनचक्रस्य
- (ii) पक्षिसमूहस्य
- (iii) नक्षत्रमण्डलस्य

(द) सा <u>उपत्यकां</u> विभजन्ती सिन्धुनदी अस्ति।

(i) पर्वतमालाम्

(ii) पृथ्वीम्

(iii) घाटिकाम्

(द) <u>सत्त्वं च</u> न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।

(i) मनः

(ii) सतोगुणः

(iii) जीवः

## खण्डः – 'घ' 10

## सामान्यः संस्कृतसाहित्यपरिचयः

### भाग–2

16 (अ) अधोलिखितानां कवीनां देश–काल–कृतीनां यथानिर्देशं नामानि लिखत। 1×5 =5

कवयः

(i) मासः कृतिद्वयम् ........................

(ii) विशाखदत्तः कालः ........................ कृतिरेका ........................

(iii) चाणक्यः कालः ........................ कृतिः ........................

(iv) विष्णुशर्मा कालः ........................ कृतिः ........................

(v) अम्बिकादत्त व्यासः देशः ........................ कालः ........................

**अथवा** 5

अधोलिखितेषु कस्याप्येकस्य कवेः संक्षिप्तः परिचयः संस्कृतेन लेख्यः। 5

कालिदासः, भारविः, भासः

16 (ब) अधोलिखितेषु मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा पुनः लिखत। ½×10=5

(i) प्रकरणम् .................................... भेदः अस्ति।

(ii) नाटकस्य आरम्भे प्रस्तावना अन्ते च .................................... भवति।

(iii) प्रकरणे .................................... अङ्काः भवन्ति।

(iv) चम्पूकाव्यम् .................................... भवति।

(v) गद्यकाव्यानां विधा भवति कथा .................................... च।

(vi) महाकाव्ये न्यूनतमाः .................................... सर्गाः भवन्ति।

(vii) गीतिकाव्यम् .................................... अन्तर्गतं भवति।

(viii) महाकाव्यस्य नायकः .................................... भवति।

(ix) छन्दोमयी रचना .................................... कथ्यते।

(x) खण्डकाव्ये जीवनस्य .................................... वर्णनं भवति।

मञ्जूषा–

| |
|---|
| आख्यायि, खण्डकाव्यस्य, एकपक्षस्य, गद्यपद्यमयं, रूपकस्य, धीरोदात्तः, भरतवाक्यम्, दश, अष्ट, पद्यम् |

**अथवा**

नाटकस्य प्रमुख विशेषताः संस्कृतेन लिखत। 5

# कक्षा – XII (केन्द्रिकम्)

# ‘संस्कृतम्’

# अपेक्षित– उत्तराणि अङ्कयोजना च

**खण्डः ‘क’ अपठितांश–अवबोधनम्** **10**

**1.** I. (अ) एकपदेन उत्तरत ½×4=2

(i) समयस्य

(ii) क्षणम्

(iii) समयः

(iv) कालः

(ब) पूर्णवाक्येन उत्तरम्

(i) समयस्य महत्त्वम् अजानन्तः अनेके जनाः दुर्व्यसने, द्यूते, विवादे, वृथाभ्रमणे, निद्रायां च समस्त समयं यापयन्ति। 1×2 =2

(ii) सफलतायाः समुन्नतेः च मूलमन्त्रम् ‘प्रत्येकं क्षणस्य सदुपयोगः’ अस्ति।

(स) यथानिर्देशमुत्तराणि।

(i) मानवजीवनाय

(ii) जनाः 1×4

(iii) धनादिकवस्तूनि =4

(iv) सदुपयोगः

(द) समयस्य महत्त्वम्/समयस्य सदुपयोगः/मूल्यवान् समयः

**अथवा**

अन्यत् किमपि उचितं शीर्षकम्। 1×2 =2

**खण्डः ‘ख’ संस्कृतेन रचनात्मककार्यम्**

**2.** पत्रलेखनम्– उत्तरपुस्तिकायां पूर्णपत्रं लेखनीयम्। ½ ×10= 5

(i) प्रयागतः

(ii) सादरं प्रणामाः

(iii) मम

(iv) पञ्चनवतिः

(v) समुपलब्धाः

(vi) सर्वाधिकान्

(vii) वर्धापनं

(viii) मार्गदर्शनम्

(ix) प्रणामाञ्जलिः

(x) सत्यव्रतः

3. लघुकथालेखनम्। ½×10=5

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (i) | वनस्य | (ii) | विश्रान्तुं | (iii) | भल्लूकं | (iv) | भयभीतौ |
| (v) | आरुध्य | (vi) | भूमौ | (vii) | मृतं | (viii) | अवातरत् |
| (ix) | कर्णयोः | (x) | मैत्री | | | | |

4. अनुच्छेदलेखनम् विषयः विद्याधनं सर्वधनप्रधानम्' 1×5=5

छात्राः मञ्जूषायां प्रदत्तपदानां सहायतया स्वेच्छया पञ्च वाक्यानि लेखिष्यन्ति।

## खण्डः 'ग' अनुप्रयुक्तव्याकरणम्

5. 1×6=6

| | | | |
|---|---|---|---|
| (i) | न + अनृतम् | (ii) | इनः + च |
| (iii) | उत् + लंघनम् | (iv) | तत् + आकर्ण्य |
| (v) | धनैः + अपयशः | (iv) | दुःखानि + अनुभूय |

6. समस्तपदानां विग्रहः 1×6=6

| | | | |
|---|---|---|---|
| (i) | राष्ट्रस्य संरक्षणम् | (ii) | उत्सवाः प्रियाः यस्मै सः |
| (iii) | शोभना महिमा | (iv) | विभवम् अनतिक्रम्य |
| (v) | अहः च रात्रिः च तयोः समाहारः | | |
| (vi) | कौमुद्याः महोत्सवः | | |

7. प्रकृतिप्रत्यययोगेन रिक्तस्थानपूर्तिः 5+3=8

| | | | | |
|---|---|---|---|---|
| (अ) | (i) | प्रविश्य | (ii) | पालनीया |
| | (iii) | श्रोतुम् | (iv) | आगन्तव्यम् |
| | (v) | धावन्तः | | |
| (आ) | (vi) | अधिकारिणः | (vii) | भव्यता |
| | (viii) | ज्ञानवान् | | |

8. कर्तृ-क्रियापद-अन्वितिः 1×5=5

(i) इच्छति (ii) जानीथ (iii) करिष्ये (iv) अवदत् (v) आहूताः

**अथवा**

विशेषण-विशेष्यमेलनम्।

(i) वन्दिनः

(ii) सुबद्धमूलाः

(iii) रमणीयः

(iv) प्रशंसनीया

(v) बहवः

9. उपपदविभक्ति प्रयोगः 1×5=5

(i) सुगाङ्गप्रसादस्य (ii) दुर्व्यसनात्
(iii) संतापेन (iv) सभापतिभ्य:/सभापतये
(v) सिहासनम्

**10.** (क) पद्यांश: 1×5 =5

(अ) एकपदेन उत्तरम्

(i) जलम् (ii) शिक्षा

(ब) पूर्णवाक्यने

(i) हुतं च दत्तं च सदैव तिष्ठति।

(स) यथानिर्देशम्

(i) पादपा: (ii) जलस्थानगतम्
(iii) क्षयं (ii) हुतं/दत्तं

(ख) गद्यांश:

(अ) एकपदेन उत्तरम् 1×5 =5

(i) परमेष्ठिन: (ii) द्वादश

(ब) पूर्णवाक्यने

(i) सूर्य: एव उत्तरं दक्षिणं चायनम् अङ्गोकरोति।

(स) यथानिर्देशम्

(i) षण्णाम् (ii) परमेष्ठिन:
(iii) सूर्याय (ii) अयम्

(ग) नाट्यांश:

(अ) एकपदेन उत्तरम् 1×5 =5

(i) प्रस्तरखण्डम् (ii) छदिप्रान्त:

(ब) पूर्णवाक्यन

(i) निस्पृहत्यागिभि: जनै: राजा तृणवद् गण्यते।

(स) यथानिर्देशम्

(i) शुष्यमाणै: (ii) दर्भाणाम्
(iii) चन्द्रगुप्त: (ii) चाणक्याय

**11.** I. किरातार्जुनीयम्, लेखक: भारवि:। 1+1 =2
II. चारुदत्त:– विदूषकं प्रति। 1+1 =2

**12.** शुद्धभावचयनम्। 1×4 =4

(आ) (i) राज्यं प्रति कृतकल्याणकर्मभि: अपि राजलक्ष्मी: सहजतया न प्रसादनीया।

(ब) (ii) नरैः सर्वथा रक्षितं किमपि वस्तु दुर्भाग्येन विनाशं याति।

**अथवा**

भावार्थे रिक्तस्थानपूर्तिः–

(i) प्रसन्नतायाः (ii) दयापूर्ण

(iii) अमृतं (iv) परोपकाराय

**13.** I. अन्वययोः रिक्तस्थानपूर्तिः ½×8=4

(आ)

(i) भूतानि।

(ii) अनुपश्यति।

(iii) आत्मानम्

(iv) न

(आ)

(i) यस्य

(ii) सौभाग्यविलोपि

(iii) दोषः

(iv) किरणेषु

**14.** वाक्यांशमेलनम्– 1×4 =4

(i) भाग्यक्रमेण हि - धनानि पुनर्भवन्ति (स)

(ii) 'पाई' इत्यस्य मूल्यं आर्यभटेन एव सर्वप्रथमं स्पष्टीकृतम्।

(iii) आयुः क्षयोऽस्ति चेत् अन्यत्रगतानामपि मृत्युः भविष्यति। (अ)

(iv) उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। (ब)

**15.** शब्दार्थमेलनम् 1×4 =4

(अ) (ii) सम्यक्

(ब) (iii) नक्षत्रमण्डलस्य

(स) (iii) घाटिकाम्

(द) (i) मनः

## खण्डः - (घ)
## सामान्यः संस्कृतसाहित्य परिचयः

**16.** (अ) कवीनां देश–काल–कृतीनां परिचयः। 1×5 =5

(i) भासः–कृतिद्वयम् चारुदत्तम्, स्वप्नवासवदत्तम्। अथवा किमपि अन्यं कृतिद्वयम्।

(ii) विशाखदत्तः कालः सप्रम/अष्टम शताब्दी, कृतिः मुद्राराक्षसम्। ½+½=1

(iii) चाणक्यः कालः ई. पू. चतुर्थी शताब्दी, कृतिः चाणक्यनीतिः।

(iv) विष्णुशर्मा–कालः पञ्चम शताब्दी, कृतिः, पञ्चतन्त्रम्।

(v) अम्बिकादत्तव्यासः देशः राजस्थानम् कृतिः शिवराजविजयम्।

**अथवा**

कस्याचिदेकस्य कवेः संस्कृतेन संक्षिप्र, परिचयः लेखनीयः।

**16** (ब) (i) रूपकस्य ½×10=5

(ii) भटटवाक्यम्

(iii) दश

(iv) गद्यपद्यमयम्

(v) आख्यायिका

(vi) अष्ट

(vii) खण्डकाव्यस्य

(viii) धीरोदात्तः

(ix) पद्यम्

(x) एकपक्षस्य

**अथवा**

नाटकस्य काश्चन प्रमुखाः विशेषताः संस्कृतेन लेखनीयाः। 1×5=5